श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः
**प्रो. गोपबन्धुमिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका
**डॉ. बी. उमामहेश्वरी**
सहायिकाचार्या
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्सः २४४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

**सहायकसम्पादकः समन्वयकश्च**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, 2020*

**संस्करणम्** - प्रथमम्

**वर्षम्** - मार्च -२०२०

**प्रतिकृतयः** - ३५०

**ISBN** - 978-93-83097-35-7

**मूल्यम्** - ₹५१०/-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ऑफसेट
परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,
एस. टी. रोड, वेरावल-३६२ २६६,
जि. गीर-सोमनाथ, गुजरात (भारत)
दूरभाष - ०२८७६-२२१८६१

# स्वप्नवासवदत्ते दार्शनिकः विचारः

प्रो. महेन्द्रकुमारः अं. दवे
प्रोफेसर, साहित्यविभागः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्।

संस्कृतकाव्यजगति नाटकं रम्यम् अस्ति। अतः नाट्यं पञ्चमोवेदः इति नाट्याचार्यः भरतः कथयति। यथा-

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विनोदजननं लोके नाट्यमेतद्भविष्यति ॥**[१]

अर्थात् दुःखार्तस्य, श्रमार्तस्य, शोकार्तस्य एवं तपस्विनः कृते नाट्यं विश्रांतिं ददाति। सर्वेभ्यः नाट्यं आनन्दं ददाति अत एव भरतः "नाट्यं भावानुकीर्तनम्".[२] इति कथयति।

यद्यपि दर्शनपदेनात्र दृश्यतेऽनेनेति व्युत्पत्त्या लौकिकालौकिकोभयविध प्रत्यक्षकारकाणि ब्राह्येन्द्रियाणि भवितुमर्हन्ति, तथापि दृश्यते ज्ञायत आत्माऽनेनेति व्युत्पत्त्या ज्ञानसामान्यार्थकाद् 'दृश्' धातोः करणल्युटा निष्पन्नदर्शनपदेन चेतनवस्तुविचारपरमागमात्मकं शास्त्रं गृह्यते। तानि शास्त्राणि प्रसिद्धानीमानि बोध्यानि। तथाहि.....

**कपिलस्य कणादस्य गौतमस्य पतञ्जलेः।**
**व्यासस्य जैमिनेश्चापि शास्त्राण्याहुः षडेव हि ॥**

इत्युक्त्या स्तिकनास्तिकभेदेन दर्शनस्य द्वैविध्येऽपि षडास्तिकानि दर्शनानि बोध्यानि। विभिन्नानामेतेषां दर्शनानां यथास्थानं स्वनिर्मितेषु साहित्यग्रन्थेषु मनीषिमूर्धन्यो महाकविः भासः समुचितवर्णनद्वारा स्वीयां प्रतिभां यथा प्रदर्शितवान् न केनापि विदुषा तद्विदितम्।

---

१ नाट्यशास्त्रम् - १

२ नाट्यशास्त्रम् - १

सामाजिकजीवनस्य प्रतिबिम्बमस्ति। अतः कुशलनाट्यकार:

नाट्यं सामाजिकजीवनस्य सम्यक्तया प्रस्तुस्ती। भासः अपि कथनीयम् नाट्यमाध्यमेन सम्यक्तया प्रस्तुस्तौ। भासः अपि उत्तम नाट्यकारः अस्ति। संस्कृतनाट्यसाहित्यस्य इतिहासे भासस्य कीर्तिः आधिकी वर्तते। संपूर्णभारतवर्षे तस्य कीर्तेः। प्रभावः प्रकाशते तथा च महाकविकालिदासः मालविकाग्निमित्रे **“नाट्यं भिन्नरुचेर्जनस्य समाराधनम्”** इति कथयति। नाट्यं सर्वेभ्यः आ नंदं ददाति । भासस्य नाटके अस्य विधानस्य सम्पूर्णतया परिपालनं भवति। नाटकान्तं कवित्वम्। नाट्ये त्रिलोकस्य भावानुकीर्तनं भवति। प्राचीननाट्यकारं भासं महाकविकालिदासः अपि गौरवेण निर्देशं कृत्वा भावांजलिं प्रकटयति। भासेन रचितानि त्रयोदशनाटकानि वैविध्यपूर्णानि सन्ति। तेषु सः सफलः नाट्यकारः प्रतीयते। तेषु नाटकेषु अधिकं रम्यं स्वप्नवासवदत्तस्य कृते। राजशेखरः “स्वप्नवासवदत्तस्य दाहकोऽभून्नः पावकः” इत्युक्त्वा अस्य नाटकस्य श्रेष्ठतां प्रतिपादयति। उदयनकथां आश्रित्य इदं श्रेष्ठं नाटकं रचितम्अस्ति। स्वप्नवासवदत्तस्य स्वप्नप्रयुक्तं दृश्यं अत्यतं महत्वपूर्णमअस्ति। एवं संस्कृतनाटकानां कल्पनायां अयं प्रसङ्गः श्रेष्ठो अस्ति। अस्मिन् नाटके मनोरञ्जनं तु अस्ति एव, किन्तु तस्मिन् सामाजिकानामुपदेशानामपि स्वाभाविक समन्वयः दृश्यते। अत एव स्वप्नवासवदत्तनाटके दार्शनिकसिद्धांतानां समीक्षणम्अपि कृतवान्।

विशेषं तु किम्? किन्तु अस्मिन् स्वाध्यायपत्रे निरूपितेषु सिद्धांतेषु एकस्य उदाहरणं ददामि, भारतीय दर्शनशास्त्रेषु एकम् उदाहरणं ददामि। भारतीय आस्तिकदर्शनानुसारं आत्मा अमरः अस्ति। एवं जगतः परिवर्तनशीलम् अस्ति। आत्मा शाश्वतः अस्ति एवं प्रकृतिः अनित्या अस्ति। अयं सिद्धांतः स्वप्नवासवदत्तनाटके कविना स्पष्टरूपेण वर्णिता।

प्रथमे अङ्के तपोवनस्य एकं दृश्यं वर्तते यत् संपूर्णतया दार्शनिकं वर्तते। तस्मिन् स्वनृपाय उदयनाय राज्यस्य पुनःप्राप्तिः भवेत् तदर्थं तस्य मन्त्री योगन्धरायणः प्रयत्नशीलो भवति तथा कृत योजनानुसारं वासवदत्ता

अवन्तिकारूपेण तथा स्वयं परिव्राजकरूपेण आश्रमे राजमाता समीपं आगच्छति। पद्मावत्या सह न्यासरूपेण संस्थापनस्य कारणम् अस्ति यत् पुष्पकभद्रकादि ज्योतिषैः यत् भविष्यं भणितम् आसीत् तत् पद्मावत्यां विवाहः उदयेनेन सह भविष्यति। अतः न्यासरूपेण तस्याः भगिन्याः प्रोषितभर्तृका कथयित्वा पद्मावत्याः समीपे स्वीकारार्थे कथयति तदा कञ्चुकी 'दुःखं न्यासस्य रक्षणम्' इति कथयित्वा रक्षणस्य काठिन्यं वर्णयति किन्तु वचनपालनेन तत्परा पद्मावती इमं प्रस्तावं अपि स्वीकरोति। अत्र वासवदत्तायाः मनोमंथनं विशेषरूपेण चित्रितं भवति। अत्र ईशावास्योपनिषदः श्लोकः स्मर्यते यत् –

**ईशावास्यमिदं सर्वं यत् किञ्चत् जगत्यां जगत्।**

**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यश्विद्धनम्॥**[३]

अस्मिन् प्रसङ्गे अयं सिद्धांतः दृश्यते। वासवदत्तायाः इत्थं मनोभावान् श्रुत्वा योगन्धरायणः भुक्त्वोज्झित एव विषयोऽत्रभवत्याः। नात्र चिंता कार्या इति कथयित्वा "चक्रारपङ्क्तिरिव गच्छति भाग्यपंक्तिः"[४] इति कथनेन सांख्यशास्त्रस्य ज्ञानस्य प्रदर्शनं भवति।

राजा उदयनः वासवदत्तायां आसक्तः अस्ति। स राजस्य कार्ये ध्यानं न ददाति। स्वकर्मणि सः प्रमादं करोति। "स्वे स्वे कर्मण्यभिरतः नरः संसिद्धिं लभते"। किन्तु अत्र उदयनः स्वकर्मणा भ्रष्टः भवति। अतः तस्य उपरि आपत्तिः आगच्छति। किन्तु कर्मनिष्ठः योगन्धरायणः यत् योजनां करोति तेषां योजनायां सहयोगः वासवदत्ताऽपि करोति। नृपं प्रति वासवदत्तायाः अप्रतिमः प्रेम अस्ति तदपि राज्यस्य कल्याणाय पतेः सुखाय सा स्वल्पभोगं

---

३ ईशावास्योपनिषद्-२

४ पूर्वं त्वयाप्यभिमतं गतमेवमासीत् श्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।
कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥
स्वप्नवासवदत्तम् - १-४

ददाति। अत्र मानवजीवने त्यागवृत्याः एकः उत्तमः सन्देशः कविना प्रदत्तः वर्तते।

अस्मिन् नाटके कविः उदयनस्य वासवदत्तां प्रति आसक्तेः निर्देशं करोति। उदयनः वासवदत्ता लावाणकस्य गृहे ज्वलिता इति समाचारं श्रुत्वा राजा उदयनः तस्याः आभुषणानि गृहीत्वा अग्निं प्रवेष्टुम् इच्छति। मन्त्रिः प्रयासेन तं वारयति। इत्यादयः विविधाःप्रसङ्गाः सन्ति तेषु प्रसङ्गेषु उदयनस्य मोहस्य दर्शनं भवति। सामान्यमनुष्यस्य जीवनेऽपि मोहः, माया, मदः, इर्ष्या क्रोधः इत्यादयः भावाः आगच्छन्ति। अत्र उदयनस्य मोहस्य निरूपणं कृत्वा कविः दार्शनिकसिद्धान्तं वर्णयति। इत्थं स्वप्नवासवदत्ते नाट्य-संगीत-नृत्य-कला-र्थिनजीवन–शिक्षा-साहित्य-धर्मादीनां प्राबल्यमुपलभ्यते तथाप्येषां महत्त्वं तदैव स्यात्, यदा प्राणात्मकान्तः संचरणशीलमध्यात्मस्वरूपं दार्शिनिकतत्त्वं तत्राभिनिहितं भवेत्। अनेन विना प्रतिभाप्रज्ञा जलविहीना मत्स्या इव सततं तृष्णायते। अतस्तादृशीं तृष्णां प्रशमनार्थमेव महाकविः भासः स्वप्नवासवदत्ते दार्शिनिकरहस्यं प्रकाशयति॥

+++